# दशमः पाठः–नीतिनवनीतम

**प्रश्न 1:**

अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-

(क) नृणां सम्भवे कौ क्लेशं सहेते?

(ख) कीदृशं जलं पिबेत्?

(ग) नीतिनवनीतं पाठः कस्मात् ग्रन्थात् सङ्कलित?

(घ) कीदृशीं वाचं वदेत्?

(ङ) दु:खं किं भवति?

(च) आत्मवशं किं भवति?

(छ) कीदृशं कर्म समाचरेत्?

**उत्तर 1:**

(क) मातापितरौ

(ख) वस्त्रपूतम्

(ग) मनुस्मृतेः

(घ) सत्यपूताम्

(ङ) परवशम्

(च) सुखम्

(छ) मन:पूतम्

**प्रश्न 2:**

अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत-

(क) पाठेऽस्मिन् सुखदु:खयोः किं लक्षणम् उक्तम्?

(ख) वर्षशतैः अपि कस्य निष्कृतिः कर्तुं न शक्या?

(ग) "त्रिषु तुष्टेषु तपः समाप्यते" - वाक्येऽस्मिन् त्रयः के सन्ति?

(घ) अस्माभिः कीदृशं कर्म कर्तव्यम्?

(ङ) अभिवादनशीलस्य कानि वर्धन्ते?

(च) सर्वदा केषां प्रियं कुर्यात्?

**उत्तर 2:**

(क) पाठेऽस्मिन् सुखदु:खयो: लक्षणमस्ति–परवशं सर्वं दु:खम् आत्मवशं च सर्वं सुखम्।

(ख) वर्षशतै: अपि मातापितरौ नृणां सम्भवे यं क्लेशं सहेते तस्य निष्कृति: कर्तुं न शक्या।

(ग) "त्रिषु तुष्टेषु तप: समाप्यते"- वाक्येऽस्मिन त्रय: माता-पिता-आचार्या: सन्ति।

(घ) यत् कर्म कुर्वत: अस्य आत्मन: परितोष: स्यात् तत् कर्म अस्माभि: कर्तव्यम्।

(ङ) अभिवादनशीलस्य आयु:, विद्या, यश: बलञ्च एतानि चत्वारि वर्धन्ते।

(च) सर्वदा माता-पिता-आचार्याणां प्रियं कुर्यात्।

**प्रश्न 3:**

स्थूलपदान्यवलम्ब्य प्रश्ननिर्माणं कुरुत-

(क) **वृद्धोपसेविन:** आयुर्विद्या यशो बलं न वर्धन्ते।

(ख) मनुष्य: **सत्यपूतां** वाचं वदेत्।

(ग) त्रिषु तुष्टेषु सर्वं **तप:** समाप्यते?

(घ) **मातापितरौ** नृणां सम्भवे अकथनीयं क्लेशं सहेते।

(ङ) **तयो:** नित्यं प्रियं कुर्यात्।

**उत्तर 3:**

(क) **कस्य** आयुर्विद्या यशो बलं न वर्धन्ते?

(ख) मनुष्य: **कीदृशीम्** वाचं वदेत्?

(ग) त्रिषु तुष्टेषु सर्वं **किम्** समाप्यते?

(घ) **कौ** नृणां सम्भवे अकथनीयं क्लेशं सहेते?

(ङ) **कयो:** नित्यं प्रियं कुर्यात्?

**प्रश्न 4:**

संस्कृतभाषयां वाक्यप्रयोगं कुरुत-

(क) विद्या (ख) तप: (ग) समाचरेत् (घ) परितोष: (ङ) नित्यम्

**उत्तर 4:**

(क) अभिवादनशीलस्य **विद्या** वर्धते।

(ख) मातापितरौ स्वपुत्रस्य पालने **तप:** कुरुत:।

(ग) मनसा विचार्य एव कर्म **समाचरेत्**।

(घ) शुद्धचरणेन **परितोष:** भवति।

(ङ) जनै: **नित्यम्** शुद्धाचरणं कर्तव्यम्।

**प्रश्न 5:**

शुद्धवाक्यानां समक्षम् आम् अशुद्धवाक्यानां समक्षं च नैव इति लिखत-

(क) अभिवादनशीलस्य किमपि न वर्धते।

(ख) मातापितरौ नृणां सम्भवे कष्टं सहेते।

(ग) आत्मवशं तु सर्वमेव दु:खमस्ति।

(घ) येन पितरौ आचार्य: च सन्तुष्टा: तस्य सर्व तप: समाप्यते।

(ङ) मनुष्य: सदैव मन: पूतं समाचरेत्।

(च) मनुष्य: सदैव तदेव कर्म कुर्यात् येनान्तरात्मा तुष्यते।

**उत्तर 5:**

| | |
|---|---|
| (क) अभिवादनशीलस्य किमपि न वर्धते। | **नैव** |
| (ख) मातापितरौ नृणां सम्भवे कष्टं सहेते। | **आम्** |
| (ग) आत्मवशं तु सर्वमेव दु:खमस्ति। | **नैव** |
| (घ) येन पितरौ आचार्य: च सन्तुष्टा: तस्य सर्व तप: समाप्यते। | **आम्** |
| (ङ) मनुष्य: सदैव मन: पूतं समाचरेत्। | **आम्** |
| (च) मनुष्य: सदैव तदेव कर्म कुर्यात् येनान्तरात्मा तुष्यते। | **आम्** |

**प्रश्न 6:**

समुचितपदेन रिक्तस्थानानि पूरयत-

(क) मातापित्रो: तपस: निष्कृति: ............... कर्तुमशक्या। (दशवर्षैरपि/षष्टि: वर्षैरपि/वर्षशतैरपि)।

(ख) नित्यं वृद्धोपसेविन: ............... वर्धन्ते (चत्वारि/पञ्च/षट्)।

(ग) त्रिषु तुष्टेषु ............... सर्व समाप्यते (जप:/तप:/कर्म)।

(घ) एतत् विद्यात् ............... लक्षणं सुखदु:खयो:। (शरीरेण!समासेन/विस्तारेण)

(ङ) दृष्टिपूतम् न्यसेत् ...............। (हस्तम्/पादम्/मुखम्)

(च) मनुष्य: मातापित्रो: आचार्यस्य च सर्वदा .......... कुर्यात्। (प्रियम्/अप्रियम्/अकार्यम्)

**उत्तर 6:**

(क) मातापित्रो: तपस: निष्कृति: **वर्षशतैरपि** कर्तुमशक्या। (दशवर्षैरपि/षष्टि: वर्षैरपि/वर्षशतैरपि)।

(ख) नित्यं वृद्धोपसेविन: **चत्वारि** वर्धन्ते (चत्वारि/पञ्च/षट्)।

(ग) त्रिषु तुष्टेषु **तप:** सर्वं समाप्यते (जप:/तप:/कर्म)।

(घ) एतत् विद्यात् **समासेन** लक्षणं सुखदु:खयो:। (शरीरेण!समासेन/विस्तारेण)

(ङ) दृष्टिपूतम् न्यसेत् **पादम्**। (हस्तम्/पादम्/मुखम्)

(च) मनुष्य: मातापित्रो: आचार्यस्य च सर्वदा **प्रियम** कुर्यात्। (प्रियम्/अप्रियम्/अकार्यम्)

**प्रश्न 7:**

मञ्जूषात: चित्वा उचिताव्ययेन वाक्यपूर्तिं कुरुत-

| तावत् | अपि | एव | यथा | नित्यं | यादृशम् |
|---|---|---|---|---|---|

(क) तयो: ………………… प्रियं कुर्यात्।

(ख) ………………… कर्म करिष्यसि। तादृशं फलं प्राप्स्यसि।

(ग) वर्षशतै: ………………… निष्कृति: न कर्तुं शक्या।

(घ) तेषु …………………त्रिषु तुष्टेषु तप: समाप्यते।

(ङ) ………………… राजा तथा प्रजा

(च) यावत् सफल: न भवति ………………… परिश्रमं कुरु।

**उत्तर 7:**

(क) तयो: **नित्यं** प्रियं कुर्यात्।

(ख) **यादृशम्** कर्म करिष्यसि। तादृशं फलं प्राप्स्यसि।

(ग) वर्षशतै: **अपि** निष्कृति: न कर्तुं शक्या।

(घ) तेषु **एव** त्रिषु तुष्टेषु तप: समाप्यते।

(ङ) **यथा** राजा तथा प्रजा

(च) यावत् सफल: न भवति **तावत्** परिश्रमं कुरु।